क्षेऽजीवति तन्न स्यादनृतं मूलमात्मनः॥ ॥ ॥

तं तमिमं श्रुत्यर्थं दर्शयन्नाह। ओमित्यंगीकारेण यत्प्रोक्तं तत्सत्यं नेति यदाह तदेवानृतं॥ तत्र च सत्यमीषदनृतं विना न सिध्यतीत्याह॥

सत्यं पुष्पफलं विंद्याज्जानीयात्॥ आत्मवृक्षस्य देहरूपस्य। कुतः गीयते श्रुत्योच्यते इत्यर्थः॥ पाठांतरं तु सुगमं। यद्यपि श्रुत्यावाचः शतेन।४

सत्यं पुष्पफलं चेत्युक्तं तथापि वाचो देहनिर्वाहाधीनत्वात् आत्मवृक्षस्येति प्रस्तुतानुसारेणोक्तं॥ भवतु पुष्पफलस्थानीयं

सत्यं ततः किमत आह। वृक्षे देहे अजीवति तत्पुष्पफलं न स्यात्॥ सा न स्यादिति पाठे तु वाक्पावाचः परामर्शः। देहश्चानृतेन रक्ष

णीय इत्याह॥ अनृतं तु आत्मनो देहस्य मूलं॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

एतदेवदृष्टांतेनस्पष्टयति।तद्यथावृक्षउत्पाटितमूलःशुष्यति।अचिरादेवोद्वर्ततेपततिच।एवनष्टमनृतंयस्यसआत्मादेहःशुष्ये
त्।यद्यपिवश्यकृत्याएवमेवानृतंवदन्नात्मानमविर्मूलंकरोत्येवंनिंद्यानृतंनिषिद्धंतथापिउपसंहारानुसारेणतत्केवलानृतविष
यमित्यभिप्रेत्यैवव्याख्यातं।दयेतत्त्वेतेनेतिवर्तयेवाकः।तथाचश्रुतिः।ओमितिसत्यंनेत्यनृतंतदेतत्पुष्पफलंवाचोयत्सत्यंसहेश्व
रोयशस्वीतेजस्वीकल्याणकीर्तिर्भवतिपुष्पंहिफलंवाचःसत्यंवदत्यथैतन्मूलंवाचोयदनृतंतद्यथावृक्षआविर्मूलःशुष्यतिसउ
द्वर्ततएवमेवानृतंवदन्नाविर्मूलमात्मानंकरोतिसशुष्यतिसउद्वर्तते।तस्मादनृतंनवदेद्दयेतत्वेतेनेतिअनेनतुअनृतेनदयेतसंकटेया
त्मानंरक्षेदितिश्रुत्यर्थः।सर्वंवाएतत्सत्यवचनेदेहोननिर्वहेदितिस्फुटीकर्तुंसत्यस्पदोषान्तेनतस्यवगुणनाह।परागि

तद्यथावृक्षउन्मूलःशुष्यन्नुद्वर्ततेचिरात्॥एवंनष्टान्ततःसद्यआत्माशुष्येन्नसंशयः॥पराग्रिक्तमपूर्णंवा
अक्षरंयन्नवेद्मि॥यत्किंविदामीतिब्रूयात्तेनरिच्येतवैपुमान्॥रिक्तंवैसर्वमात्मानंकुर्वन्नालंकामे
नचात्मने॥अथैतत्पूर्णमभ्यात्मंयच्चनेत्यनृतंवचः॥ ॥७॥

तिद्वाभ्यां।यद्वेदामीतियदक्षरंतत्पराक्दूरेअर्थंगृहीत्वावर्ततीतिपराक्।रिक्तमितिश्रुतिपदस्यव्याख्यानमपूर्णमिति।तत्तस्मादर्थिनेय
त्किंविदोमीतिदास्यामीतिब्रूयात्तेनरिच्येतरिक्तोभवेत्।किंचभिक्षवेसर्वमात्मानंकुर्वन्दास्यामीत्यंगीकुर्वन्आत्मनेकामेन।संपद्यो
तानभवतितस्यभोगोनसिध्यतीत्यर्थः।तथाचश्रुतिः।पराग्वाएतद्रिक्तमक्षरंयत्तद्वेदामिति।तद्यत्किंविदोमित्याहात्रैवास्मैतद्रिच्यते।
सयत्सर्वमोंकुर्याद्रिच्यादात्मानंसकामेभ्योनालंस्यादिति।नेतियदनृतंवचःएतत्पूर्णंअर्थग्रपाभावात्।अभ्यात्मंवेदेतिचकार
स्यान्वयः।आत्मनोभिमुखमन्यस्यार्थमाकर्षतीत्यभ्यात्मं।योहिनित्यंममकिंविदपिनास्तिकिंदास्यामीतिब्रूतेसहितेनानृतेनपरेषा
मर्थनाकर्षतीतिप्रसिद्धं॥ ॥

ननु तर्हि इदमनृतमनृतवत्सर्वदा सेव्यं स्यादित्यत आह । सर्वमिति । तथा च श्रुतिः । अथैतत्पूर्णमभ्यात्मं यन्नेति स यत्सर्वं नेति ब्रूयात्पापिक
कास्य कीर्तिर्जायेत सैनं तत्रैव हन्यादिति । अतो वृत्तिसंकटादिष्वप्यनृतं न दोषायेत्युपसंहरति । स्त्रीषु प्रोत्साहनेन वशीकारे ।
नर्मणि परिहासे । विवाहे च वरादिस्तुतौ ॥ गवां ब्राह्मणानां च हितार्थे । हिंसायां वकस्य विश्वासाभावायां । तथा च याज्ञवल्क्यः ॥ व
र्णिनां हि वधो यत्र तत्र साक्ष्यनृतं वदेत् ॥ तथा च श्रुतिः । तस्मात्काल एव दद्यात्कालेन दद्यात् । तत्सत्यानृते मिथुनी करोतीति ॥

४५ सर्वं नेत्यनृतं ब्रूयात्स दुःकीर्तिः श्वसन्मृतः ॥ स्त्रीषु नर्मविवाहे च वृत्त्यर्थे प्राणसंकटे ॥ गोब्रा
ह्मणार्थे हिंसायां नानृतं स्याज्जुगुप्सितं ॥ ॥ इति श्रीभागवते महापुराणे ऽष्टमस्कंधे वामन ४५
प्रादुर्भावे एकोनविंशोऽध्यायः ॥ ॥ श्रीशुक उवाच ॥ ॥ बलिरेवं गृहपतिः कुलाचार्येण भा
षितः ॥ तूष्णीं भूत्वा क्षणं राजन्नुवाचावहितो गुरुं ॥ ॥ बलिरुवाच ॥ ॥ सत्यं भगवता प्रोक्तं ध
र्मोऽयं गृहमेधिनां ॥ अर्थं कामं यशो वृत्तिं यो न बाधेत कर्हिचित् ॥ स चाहं वित्तलोभेन प्रत्या
चक्षे कथं द्विजं ॥ प्रतिश्रुत्य ददामीति प्राह्लादिः कितवो यथा ॥ न ह्यसत्यात्परोऽधर्म इति हो
वाच भूरियं ॥ सर्वं वोढुमहं मन्ये ऋतेऽलीकपरं नरं ॥ नाहं बिभेमि निरयान्नाधन्यादसुखार्ण
वात् ॥ न स्थानच्यवनान्मृत्योर्यथा विप्रप्रलंभनात् ॥ ॥

॥ ॥ इत्यष्टमे एकोनविंशः ॥ विंशे त्वनृतभीतो सौ ज्ञात्वापि कपटं हरेः । ददावेव ततो विष्णुः सहसा वर्द्धताद्भुतं ॥ भगवतालया प्रोक्तं स
त्यं किं तत्र । यो ऽर्थकामादिकं न बाधेत स गृहमेधिनां धर्म इति कपटप्रत्याख्याने निराकरोमि । नन्वप्रत्यक्षानृते दोषा उक्तास्तत्राह ना
हमिति । अधन्याद्दारिद्र्यात् । मृत्योरपि ॥ ॥

किंच। यद्यद्धरादिकं तत्सर्वं संपरेतं पुरुषं हास्यति त्यक्ष्यत्येव। तत्किमिति जीवतैव स्वयं न देयमिति भावः। तथापि तावद्धृत्तिसंकल्प
रिहारार्थं मई दीयतामिति चेत्तत्राह। तस्येति। विप्रश्चेत्तेनाधनदत्तेनापि न तुष्येत तर्हि तस्यार्थस्य त्यागे दाने किं निमित्तं न किंचि
त्तथापि तावत्स्वल्पस्य दाने विप्रस्यासंतोषेण दानं व्यर्थं स्यात् अतस्तद्याचितं सर्वं देयं न च किंचिदिति भावः। तर्हि न देयमेवेति चेत्तत्रा
ह। श्रेय इति। दुस्त्यजैरसुभिरपि। के। विकल्पो विचारः। यैरिदं त्वं द्रेर्युद्धनिवर्त्तिभिरियं भूर्बुभुजे उपभुक्ता तेषामिह लोकाम्मर

यद्यद्धास्यति लोकेऽस्मिन्संपरेतं धनादिकं॥ तस्य त्यागे निमित्तं किं विप्रस्तुष्येन्न तेन चेत्॥ श्रेयः कु
र्वन्ति भूतानां साधवो दुस्त्यजासुभिः॥ दध्यङ्शिबिप्रभृतयः को विकल्पो धरादिषु॥ यैरियं बु
भुजे ब्रह्मन्दैत्येंद्रैरनिवर्त्तिभिः॥ तेषां कालोऽग्रसील्लोकान्न यशोऽधिगतं भुवि॥ सुलभा युधि विप्र
र्षे ह्यनिवृत्तास्तनुत्यजः॥ न तथा तीर्थ आयाते श्रद्धया ये धनत्यजः॥ मनस्विनः कारुणिकस्य
शोभनं यदर्थिकामोपनयेन दुर्गतिः॥ कुतः पुनर्ब्रह्मविदां भवादृशां ततो वटोरस्य ददामि वांछि
तं॥ ॥

न्लोकांश्च तेषां निति वा कालोऽग्रसीत् संहृतवान्। न तु भुवि तैरधिगतं प्राप्तं यशोऽग्रसीत्। अतः कीर्त्तिरेव साध्या नान्यदिति भावः। दे
देहत्यागादपि धनत्यागे कीर्त्तिर्भवतीत्याह। सुलभा इति। तनुं त्यजंतीति तनुत्यजः। तीर्थे पात्रे। अतोऽपि दुष्करो धनत्याग एव मया कार्य इ
ति भावः। तर्हि निर्धनत्वेन दैन्यं स्यादिति चेत्तत्राह। मनस्विन इति। यादृशात्तादृशानामप्यर्थिनां कामोपनयेन कामपूरणेन दुर्गति
र्दैन्यमिति यत्तच्छोभनं भद्रमेव। भवादृशानां तु कामोपनयेन दुर्गतिः शोभनमिति किं पुनर्वक्तव्यमित्यर्थः॥ ॥

नं०४०

ननुनायंवटुः किंतुविष्णुस्तवशत्रुरित्युक्तंतर्हिसुतरामेवदास्यामीत्याह। यजंतीति। परः शत्रुर्वास्तु। यद्यपिपरोनजिहासतिनहिंसु
देमांहत्वाएनांभूमिंहरेत। शयीतवा। सम्यक्‌ज्ञातः सन्‌ममचित्तेशयीतेतिवास्तनोर्थः। अश्रद्धितमजातश्रद्धं। जालकोमुक्ताभ

यजंतियज्ञंक्रतुभिर्यमादृताभवंतआम्नायविधानकोविदाः॥ सएषविष्णुर्वरदोस्तुवापरोदास्या
म्यमुष्मैक्षितिमीप्सितांमुने॥ यद्यप्यसावधर्मेणमांवध्नीयादनागसं॥ तथाप्येनंनहिंसिष्येभीतं
ब्रह्मतनुंरिपुं॥ एषवाउत्तमश्लोकोनजिहासतियद्यशः॥ हत्वामैनंहरेद्युद्धेशयीतनिहतोमयि॥
॥ ॥श्रीशुकउवाच॥ ॥एवमश्रद्धितंशिष्यमनादेशकरंगुरुः॥ शशापदैवप्रहितःसत्यसंधं
४६ मनस्विनं॥ दृढंपंडितमान्यज्ञःस्तब्धोस्यस्मदुपेक्षया॥ मच्छासनातिगोयस्त्वमचिराद्भ्रश्यसेश्रि
यः॥ एवंशप्तःस्वगुरुणासत्यान्नचलितोमहान्‌॥ वामनायददावेतामर्चित्वोदकपूर्वकं॥
विंध्यावलिस्तदागत्यपत्नीजालकमालिनी॥ आनिन्येकलशंहैममवनेजन्यपांभृतं॥ ४६
यजमानःस्वयंतस्यश्रीमत्पादयुगंमुदा॥ अवनिज्यावहन्मूर्ध्नितदपोविश्वपावनीः॥ तदाः
सुरेंद्रंदिविदेवतागणागंधर्वविद्याधरसिद्धचारणाः॥ तत्कर्मसर्वेपिगृणंतआर्जवंप्रसूनवर्षैर्वव
षुर्मुदान्विताः॥ नेदुर्मुहुर्दुंदुभयःसहस्रशोगंधर्वकिंपूरुषकिंनराजगुः॥ मनस्विनानेनकृतंसुदु
ष्करंविद्वानदाद्यद्रिपवेजगत्त्रयं॥ तद्वामनंरूपमवर्धताद्भुतंहरेरनंतस्यगुणत्रयात्मकं॥ भूः
खंदिशोद्यौर्विवराःपयोधयस्तिर्यङ्‌नृदेवाऋषयोयदासन्‌॥ ॥

रणविशेषस्तन्मालावती। अवनेजनीनामपांकलशंभृतंपूर्णं। अवर्द्धतवांछा...ः प्रतिगृह्यतामितिवलिनापूर्वमुक्तत्वात्‌॥
गुणत्रयात्मकंसर्वात्मकमित्याह। भूरिति। ... मित्यादभोयद्यस्मिन्‌स्थिताआसन्‌॥ ॥

रूत्विग॥ द्विसहितोवनित्तस्यकरेः कायेएतद्विश्वंददर्श॥ तदेवप्रपंचयति॥ रसामितिपादोनैः सप्तभिः॥ मारुतंगणंवायुसंघं॥ इंद्रस्यनेर्फ

वति

कायेस्तस्यमहाविभूतेः सहर्त्विग्वार्यसदस्यएतत्॥ ददर्शविश्वंत्रिगुणंगुणात्मके भूतेंद्रियार्थाः
यजीवयुक्तं॥ रसामवष्टांघ्रितलेपपादयोर्महीमही॥ ध्रान्सुरूषस्यजंघयोः॥ पतत्त्रिणांजानुनिवि
श्वमूर्त्तेरूर्वोर्गणंमारुतमिंद्रसेनः॥ संध्यांविभोर्वाससिगुह्यएतत्प्रजापतीन्जघनेआत्ममुख्या
न्॥ नाभ्यांनभःकुक्षिषुसप्तसिंधूनुरुक्रमस्यारसिचर्क्षमालां॥ हृद्यंग धर्मस्तनयोर्मुरारेरृतंच
सत्यंचमनस्यथेंदुं॥ श्रियंचवक्षस्यरविंदहस्तांकंठेचसामानिसमस्तरेफान्॥ इंद्रप्रधानान
मरान्भुजेषुतत्कर्णयोः ककुभोद्यौश्चमूर्ध्नि॥ केशेषुमेघान्श्वसनंनासिकायामक्ष्णोश्चसूर्यंवद
नेनवह्निं॥ वाण्यांचछंदांसिरसेजलेशंभ्रुवोर्निषेधंचविधिंचपक्ष्मसु॥ अहश्चरात्रिंचपरस्यपुंसो
मन्युंललाटेधरएवलोभं॥ स्पर्शेचकाम न्परेतसोंभः पृष्ठेत्वधर्मंक्रमणेचयज्ञं॥ छायासुमृत्युंह
सितेचमायांतनूरुहेष्वोषधिजातयश्च॥ नदीश्चनाडीषुशिलानखेषुबुद्धावजंदेवगणान्षींश्च॥ प्रा
णेषुगात्रेस्थिरजंगमानिसर्वाणिमनीदंभुवनंनिरीक्ष्य॥ सर्वेसुराःकमलमापुरंगसुदर्शनंचक्रम
सह्यतेजः॥ धनुश्चशार्ङ्गंस्तनयित्नुघोषंपर्यन्यघोषोजल[illegible]जःपांचजन्यः॥ ग२॥

श्चचर्माहान्॥ द्यौश्चद्यांवरसेरसने॥ रेतसोरेतसि॥ क्रमणेषुपादन्यासेषु॥ औषधिजातीश्च॥ प्राणेषुइंद्रियेषु॥ सर्वात्मनीत्यादिवाक्यंत
रं॥ सुदर्शनमित्यादीनामीशमुपतस्थुरित्युत्तरेणान्वयः॥ ॥

विद्याधरसंज्ञोसि:।मीनकुंडलेस्फुरंतिकिरीटादीनियस्यस:।मधुव्रतानांस्रजोयस्यास्तयावनमालयाश्रीवत्सादिभिश्चावृतोव्याप्त:।उ
रुक्रमत्वमेवाह।क्षितिमिति।द्वितीयेपदंक्रमतोविद्धिपस्त्रिविष्टपंतदीयंकिंचिन्मात्रंजातंतृतीयायतुनकिंचिदिनितत्रहेतु:।उरु
क्रमस्यांघ्रिस्त्रिविष्टपादुपर्युपरिगच्छन्महर्जनाभ्यांतपसश्चपरंसत्यलोकंगतइति॥ ॥इत्यष्टमेविं[illegible]शोध्याय:॥ ॥ ॥

ट: गा।
कौमोदकीविष्णुगदातरस्विनीविद्याधरोसि:शातवेदसुक्रु:॥तूणेत्तमावक्षयसायकौचसुनं
दमुख्याउपतस्थुरीशं॥स्फुरत्किरीटांगदमीनकुंडल:श्रीवत्सरत्नोत्तममेखलांबरै:॥मधुव्रत
४७ स्रग्वनमालयावृतोरराजराजन्भगवानुरुक्रम:॥क्षितिंपदैकेनवलेर्विचक्रमेनभ:शरीरेण
दिशश्चवाहुभि:॥पदंद्वितीयेक्रमतस्त्रिविष्टपंनवैतृतीयस्यतदीयमण्वपि॥उरुक्रमस्यांघ्रि
रुपर्युपर्यथोमहर्जनाभ्यांतपस:परंगत:॥ ॥इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेवाम
नविश्वरूपोनामविंशोध्याय:॥ ॥शुकउवाच॥ ॥सत्यंसमीक्ष्याब्जभवोनखेंदुभिर्हतस्व ४७
धामद्युतिरावृतोभ्यगात्॥मरीचिमिश्राऋषयोबृहद्व्रता:सनंदनाद्यानरदेवयोगिन:॥ ॥

एकविंशेपदान्तृतिभिषेणवलिवंधनं।विष्णुनाकृतमुत्कर्षंतस्यख्यापयितुंजने।उरुक्रमस्यांघ्रिस्तपस:परंगतस्तानइत्युक्तंतत:किंवृत्तं
तदाह।सत्यंसत्यलोकंप्राप्तंतमंघ्रिंसमीक्ष्याब्जभवोभ्यगात्।तथामरीचिमिश्रादयश्चेतिद्वयोरन्वय:।कथंभूतोब्जभव:हरेरंघ्रेर्नखाएवें
दवस्तैर्हतास्वधाम्नोद्युतिर्यस्यस:।स्वयंनैराट्ठत:छन्न:हेनरदेव।बृहद्व्रतायोगिन:॥ ॥

अंगानि शिक्षादीनि पुराणानि तत्संहिताश्च येगणएव समीरस्तेन दीपितंज्ञानमेवाग्निस्तेन रंधितंदग्धंकर्मकल्मषंकर्मफलंयेषांतेचयस्यवर्तं
मंघ्रिंववंदिरे। यस्यांघ्रेः स्मरणानुभावतः अकर्मकंकर्मभिरप्राप्यं। विष्णोरंघ्रये स्वयंयस्यनाभिपंकेरुहसंभवस्तस्यविष्णो

वेदोपवेदानियमान्वितायमास्तर्केतिहासांगपुराणसंहिताः॥ येचापरेयोगसमीरदीपितज्ञाना
ग्निनारंधितकर्मकल्मषाः॥ ववंदिरेयत्स्मरणानुभावतःस्वायंभुवंधामगताअकल्मषं॥ अथांघ्र
येप्रोन्नमितायविष्णोरुपाहरत्पद्मभवोऽर्हणोदकं॥ समर्च्यभक्त्याभ्यगृणाच्छुचिश्रवायन्नाभिपं
केरुहसंभवःस्वयं॥ धातुःकमंडलुजलंतदुरुक्रमस्यपादावनेजनपवित्रतमानरेंद्र॥ स्वर्धु
न्यभून्नभसिसापततीनिमार्ष्टिलोकत्रयंभगवतोविशदेवकीर्तिः॥ ब्रह्मादयोलोकनाथाःस्व
नाथायसमादृताः॥ सानुगाबलिमाजह्रुःसंक्षिप्तात्मविभूतये॥ तोयैःसमर्हणैःस्रग्भिर्दि
व्यगंधानुलेपनैः॥ धूपैर्दीपैःसुरभिभिर्लाजाक्षतफलांकुरैः॥ स्तवनैर्जयशब्दैश्चशंखदुंदुभि
निस्वनैः॥ जांबवानृक्षराजस्तुभेरीशब्दैर्मनोजवः॥ विजयंदिक्षुसर्वासुमहोत्सवमघोषय
त्॥ महीसर्वांहृतांदृष्ट्वात्रिपदव्याजयाच्ञया॥ ऊचुःस्वभर्तुरसुरादीक्षितस्यात्यमर्षिताः॥ ॥

रंघ्रिंसमर्च्य। लोकत्रयंविमार्ष्टिपवित्रयति। संक्षिप्ताउपसंहृताआत्मविभूतिःस्वविस्तारोयेनतस्मै। यथापूर्वंवामनरूपेणस्थि
तायतस्मै। त्रिपदविषयायाच्ञातस्यांव्याजःकपटंतया। स्वभर्तुर्बलेर्महींहृतांदृष्ट्वाऊचुः॥ ॥श्री॥

श्री

किमुत्सुलदाह। नवैत्रतिसार्द्धैस्त्रिभिः। अनुचराश्चतेऽसुराश्च। अर्थप्रकृत अनुकूलः। पौरुषैस्तं कालमतिवर्त्तितुमनीश्वरः समर्थो नभव

नवा अयंब्रह्मवंधुर्वि विष्णुर्मायाविनांवरः॥ द्विजरूपप्रतिछन्नो देवकार्यं चिकीर्षति॥ अनेनयाचमानेनश
त्रुणा वटुरूपिणा॥ सर्वस्वंनो हृतंभर्त्तुर्न्यस्तदंडस्यवर्हिषि॥ सत्यव्रतस्यसततंदीक्षितस्यविशेषतः
॥ नानृतंभाषितुंशक्यंब्रह्मण्यस्यदयावतः॥ तस्मादस्यवधोधर्मोभर्त्तुःशुश्रूषणंचनः॥ इत्यायुधा
निजगृहुर्बलेरनुचराऽसुराः॥ तेसर्वेवामनंहंतुंशूलपट्टिशपाणयः। अनिछंतोवलेराजन्प्रा
४८ द्रवन्जातमन्यवः॥ तानभिद्रवतोदृष्ट्वादितिजानीकपान्नृप॥ प्रहस्यानुचराविष्णोः प्रत्यषे ४८
धन्नुदायुधाः॥ नंदःसुनंदनोथजयोविजयःप्रवलोवलः॥ कुमुदःकुमुदाक्षश्चविष्वक्सेनः
पतत्रिराट्॥ जयंतःश्रुतदेवश्चपुष्पदंतोथसात्वतः॥ सर्वेनागायुतप्राणाश्चमूंतेजघ्नुरासु
रीं॥ हन्यमानान्स्वकान्दृष्ट्वापुरुषानुचरैर्बलिः॥ वारयामाससंरब्धान्काव्यशापमनुस्मर
न्॥ हेविप्रचित्तेहेराहोहेनेमश्रूयतांवचः॥ मायुध्यतनिवर्त्तध्वंननःकालोयमर्थकृत्॥ यःप्र
भुःसर्वभूतानांसुखदुःखोपपत्तये॥ तंनातिवर्त्तितुंदैत्याःपौरुषैरीश्वरःपुमान्॥ योनोभवाय
प्रागासीदभवायदिवौकसां॥ सएवभगवानद्यवर्त्तेततद्विपर्ययः॥ वलेनसचिवैर्बुद्ध्यादुर्गैर्मंत्रौ
षधादिभिः॥ सामादिभिरुपायैश्चकालंनात्येतिवैजनः॥ भवद्भिर्निर्जिताह्येतेवहुशोनुचराः
हरेः। दैवेनर्द्धैस्तएवाद्ययुधिजित्वानदंतिनः॥ एतान्वयंविजेष्यामोयदिदैवंप्रसीदति॥ तस्मात्कालंप्रती
क्षध्वंयोनोर्थत्वायकल्पते॥ शुकउवाच॥ पत्युर्निगदितंश्रुत्वादैत्यदानव
ति। हरेरनुचरादेवा दैवेनर्द्धैः समृद्धैर्भवद्भिः। अर्थत्वाय आनुकूल्याय॥ ॥ ७ ॥ यूथपाः॥ रसांनिर्विविशूराज
न्विष्णुपार्षदताडिताः॥ ॥

धी

विष्णुपद्दिष्णुराजनदतिविराड्।प्रभोःचिकीर्षितंज्ञात्वाअस्यमर्षः।अस्यसर्वस्वापहारेणममेत्यभिमानंत्याज्यदात्रीदेहस्वीकारेणाहंकारमपित्या
जयित्वापरमानुग्रहंकर्तुमिच्छति॥नचानेनतुल्योन्यःकोपिसत्यसंधोधीरोवास्तीतितद्यशःप्रख्यापनार्थंकिंचित्घातयितुमपीच्छतीति
मनोभिप्रायंज्ञात्वातेनवबंधेति।सौत्येहनिसोमाभिषवदिने।रोदस्योःद्यावापृथिव्योः।असौसूर्योमयाआत्मनेत्यन्वयः॥व्यापिनेत्यर्थः॥

कारो।

अथतार्क्ष्यसुतोज्ञात्वाविराड्विभुचिकीर्षितं॥बबंधवारुणैःपाशैर्बलिंसौत्येहनिक्रतौ॥हाहा
महान्नासीद्रोदस्योःसर्वतोदिशं॥निगृह्यमाणेसुरपतौविष्णुनाप्रभविष्णुना॥तंबद्धंवारुणैः
पाशैर्भगवानाहवामनः॥नष्टश्रियंस्थिरप्रज्ञमुदारयशसंनृप॥पदानित्रीणिदत्तानिभूमे
र्मह्यंत्वयासुर।द्वाभ्यांक्रांतामहीसर्वातृतीयमुपकल्पय॥यावत्तपत्यसौगोभिर्यावदिंदुःस
होडुभिः॥यावद्वर्षतिपर्जन्यस्तावतीभूरियंतव॥पदैकेनमयाक्रांतोभूर्लोकोदिवरैःस
ह॥स्वर्लोकस्तुद्वितीयेनपश्यतस्तेस्वमात्मना॥प्रतिश्रुतमदातुस्तेनिरयेवासइष्यते॥
विशत्वंनिरयंतस्माद्गुरुणाचानुमोदितः॥वृथामनोरथस्तस्यदूरःस्वर्गःपतत्यधः॥विप्र
लब्धोददामीतित्वयाहंचाढ्यमानिना॥तद्व्यलीकफलंभुंक्ष्वनिरयंकतिचित्समाः॥
॥ ॥इतिश्रीभागवतेमहापुराणेऽष्टमस्कंधेबलिनिग्रहेएकविंशोऽध्यायः॥ ॥ ॥

स्वंदिशश्चतनोःतन्वात्वेस्वंतदीयंसर्वस्वं॥गुरुणाशुक्रेणानुमोदितःसन्।एवंशुक्रोपिनिरयपरिहारार्थंस्वर्गोद्भ्रंशपरिहारार्थंवमनोरथं
कुर्वंतंप्रत्याह।वृथेति।यःप्रतिश्रुतस्यादानेनयाचकंविप्रलभेततस्यमनोरथोवृथैवस्वर्गश्चतस्यदूरएव।सचाधःपतत्येव।त्वयाचाहंवि
प्रलब्धः।तस्माद्व्यलीकफलमसत्यस्यफलंनिरयंभुंक्ष्वेत्यर्थः॥ ॥इतिभावार्थदीपिकायामष्टमेएकविंशः॥ ॥

द्वाविंशेतुप्रसन्नःसन्नस्याप्यस्तुतलंबलिं॥दत्वावरान्हरिर्मूर्ध्नंमत्वातद्द्वारपोभवत्॥ससमर्पिततच्चित्तनिर्मलात्वलभक्तितः॥छलि
तोबलिनाचित्रंस्वमेवार्प्ययदच्युतः॥विप्रकृतोभिद्यमानःसत्याच्चाल्यमानः।हेउत्तमश्लोकेतिकदाचिद्दः॥ममवक्वईरितंप्रति
श्रुतंनतद्व्यलीकं।त्वयाकपटेनवामनतयाभिदित्वारूपांतरस्याविःकृतत्वात्।एवमपियदिभवानव्यलीकंमन्यते।तथाऋतमे
वाहंकरोमि।मडक्तेविप्रलंभनेनभवतुमेशीर्ष्णिनिजंतृतीयंपदंकुरु।नचद्वाभ्यांविश्वंक्रांतवतोमेतवशिरःपदपर्याप्तंनभवतीतिमन्येथाः॥

४९ श्रीशुक उवाच॥ ॥एवंविप्रकृतोराजन्बलिर्भगवतासुरः॥भिद्यमानोप्यभिन्नात्माप्रत्याहा ४९
विःक्लवंवचः॥ ॥बलिरुवाच॥ ॥यद्युत्तमश्लोकभवान्ममेरितंवचोव्यलीकंसुरवर्यम
न्यते॥करोम्यृतंतन्नभवेत्प्रलंभनंपदंतृतीयंकुरुशीर्ष्णिमेनिजं॥बिभेमिनाहंनिरया
त्पदच्युतोनपाशबंधाद्व्यसनाद्दुरत्ययात्॥नैवार्थकृच्छ्राद्भवतोविनिग्रहादसाधुवा
दाद्भृशमुद्विजेयथा॥पुंसांश्लाघ्यतमंमन्येदंडमर्हत्तमार्पितं॥यन्नमातापिताभ्राता
सुहृदश्चादिशंतिहि॥ ॥४॥

वित्तेवंचितस्यद्दण्डेजातंतर्हीदमधिकमेवस्यात्वित्तादपिवित्तवतोधिकत्वादितिभावः।ननुवत्रापदर्थेधनंरक्षेद्दारान्रक्षेद्धनैरपि।आत्मा
नंसततंरक्षेद्दारैरपिधनैरपिइत्यादिवचनात्आत्मभयपरिहारायसर्वस्वंत्यज्यतेत्वंतुकुतोभीतःसन्नात्मानमर्पयसि॥अतआह।बि
भेमीति।असाधुवादात्अपकीर्तेर्यथाहंभृशमुद्विजेतथानिरयादिभ्योनबिभेमि।ननुमयानिग्रहात्तवापकीर्तिर्जातैव।अर्हत्तमेर
र्पितंयद्दंडंमाताद्योपिनहिआदिशंतिनैवददति॥हितैषिणत्वयानिगृहीतोहंश्लाघ्यएवास्मीतिभावः॥ ॥छ॥ ॥

नन्वहं देवानां हितैषी नासुराणां तत्राह। त्वं नूनमिति। पारोक्ष्यः शत्रुः छलेन वर्त्तमानः। शत्रुस्त्वं पुनर्भक्तानि वास्मात् तनुगृहीतुमेवेत्याह। यस्मि
न्निति। उह येनो प्रसिद्धं। अतो नापि लज्जा नापि मम दुःखमित्याह। तेन गुरुणा भवता। किं वा। यो यं दंडरूपो मम मातुः हस्त्वजाकृतः सनु
त्वद्नुरूपो त्रत्वेन त्वहमनुग्रहस्यपात्रमित्याह शमेनाह। पितामह इति। भवदीनाना संमतः। अत आविष्कृतः साधुवादो मस्या त्व

सं५

त्वं नूनमसुराणां नः पारोक्ष्यः परमो गुरुः॥ यो नो नेकमदांधानां विभ्रंशं चक्र आदिशात्॥ यस्मिन्वैरा
नुबंधे न रूढो नविबुधेतराः॥ वहवो लेभिरे सिद्धिं यामुहैकांतयोगिनः॥ तेनाहं निगृहीतोस्मि
भवता भूरिकर्मणा॥ बद्धश्च वारुणैः पाशैर्नानुव्रीडेन विव्यथे॥ पितामहो मे भवदीय संमतः प्र
ह्लाद आविष्कृत साधुवादः॥ भवद्विपक्षेण विचित्रवैशसं संप्रापितस्त्वत्परमः स्वपित्रा॥ किमा
त्मनानेन जहाति यो ततः किं रिक्थहारैः स्वजनाख्यदस्युभिः॥ किं जायया संसृति हेतु भू
तया मर्त्यस्य गेहैः किमु हायुषो व्ययः॥ इत्थं स निश्चित्य पितामहो महानगाधबोधो भवतः
पादपद्मं॥ ध्रुवं प्रपेदे ह्यकुतोभयं जनाद्भीतः स्वपक्षक्षपणस्य सत्तमः॥ ॥८॥

त्वमेव परम आश्रयो यस्य सः। अतो भवतो विपक्षेण विद्विषा हिरण्यकशिपुना। विचित्रं वैशसं हिंसां संप्रापितो पि देहादीनामसारतां निश्चि
त्य अकुतो भयं ध्रुवं भवतः पादपद्ममेव प्रपेदे। अपेतस्मादहमपि दैवेन तस्यैव भाग्ये नतावोतिनीत इति चतुर्णा मन्वयः। अनत आत्मनो
रिक्थहारैः पुत्रैः तिहगेहेषु केवलमायुषो व्यय एव तनु सुखं किंचित्॥ स तु प्रसिद्धो महान्। स्वपक्षदैत्यकुलं क्षपयतीति तथा॥ ॥७॥ ॥

॰४०

तस्यापि प्रसभं बलात्त्वा जिता श्रीर्यस्याययास्वश्रियास्त्वमतिः मतिः मन्युमानिदं जीवितम भ्रुवं बुध्यते॥ कथंभूतं हृतां तस्यांतिकवर्त्ति
मृत्योः संनिहितं। राकापतिः पूर्णेंदुः। अं जन विषं रूपाणां। स्वकृताहं कारादेरूपापराधस्मरणेन सव्रीडं तीवीतमधोमुखं यस्य सः।
शिरसा नमन्नेव उपेत्य मूर्द्धाननाम। वलेस्त्वत्कृतमनुग्रहं दृष्ट्वा पुलकैरंकभिश्च विप्लुतो विह्वलः॥ त्वयैवेति न त्वंद्रपदमेतदीयं

५० अयाहमप्यात्मरिपोस्तवांतिकं दैवेन नीतः प्रसभं त्याजितश्रीः॥ इदं हृतां तांतिकवर्त्ति जीवि
तं जया ध्रुवं ध्वस्तमतिर्न बुध्यते॥ ॥शुक उवाच॥ ॥तस्येदं भाषमाणस्य प्रह्लादो भगवत्प्रि
यः॥ आजगाम कुरुश्रेष्ठ राकापतिरिवोत्थितः॥ तमिंद्रसेनः स्वपितामहं श्रिया विराज
मानं नलिनायतेक्षणं॥ प्रांशुं पिशंगांबरमंजनत्विषं प्रलंबबाहुं सुभगं समैक्षत॥ तस्मैव ५०
लिर्वारुणपाशयंत्रितः समर्हणं नोपजहार पूर्ववत्॥ ननाम मूर्द्ध्नाश्रुविलोललोचनः स
व्रीडनीवीतमुखो बभूव ह॥ स तत्र हासीनमुदीक्ष्य सत्पतिं सुनंदनंदाद्यनुगैरुपासितं॥
उपेत्य भूमौ शिरसा महात्मा मना ननाम मूर्द्ध्ना पुलकाश्रुविह्वलः॥ ॥प्रह्लाद उवाच॥
त्वयैव दत्तं पदमैंद्रमूर्जितं हृतं तदेवाद्य तथैव शोभनं॥ मन्ये महानस्य कृतो ह्यनुग्रहो विभ्रं
शो यच्छ्रिय आत्ममोहात्॥ यया हि विद्वानपि मुह्यते यतस्तत्को विचष्टे गतिमात्मनो य
था॥ तस्मै नमस्ते जगदीश्वराय नारायणायाखिललोकसाक्षिणे॥ ॥७॥

यापहृतं किं तुत्वीयमेव पुनः स्वीकृतं तच्च शोभनं कृतमेव। तत्र हेतुः मन्य इति। यद्यस्मादैंद्री वयदात्मनो मोहनं तस्माद्विभ्रंशितः मे
मैह नं त्वमेवाह। यया श्रिया विद्वानपि मतः संमतो विमुह्यते। ततस्या मत्यो कोन्यः पुनः नात्मनो गतिं तत्त्वं यथावद्विचष्टे प्रपश्यति। तस्मै न म

प्रह्लादस्यानुशृण्वत एव तत उवाचेति किं विदकुं प्रष्टतइत्यर्थः। तदैव विंध्यापि वक्तुं प्रष्टत्ता तां वसंमानयन्हिरण्यगर्भः क्षणं तूष्णीं स्थितः॥
अतस्तस्याएव वाक्यं प्रथममवतारयति। बद्धंवा इत्येति। त्रिजगतः कर्तुः प्रभोः पालकस्य अस्यतः संहर्तुश्चईश्वरस्यतवान्ये किमाव
हंतिकिं समर्पयंति। त्वया अवरोपितः कर्तृवादः कर्तारः स्वतंत्रा वयमिति वादमात्रं येषां ते। अयंभावः। लोकत्रयं मया समर्पितं। त्वती
यपदानमयदेहंसमर्पयत्रतिश्रुतम्बतं करोमीति देहादिषु स्वाम्याविष्कारेण कुर्वन्नयं कुबुद्धिर्निर्लज्जश्च। यतस्त्वमेव सर्वस्याधिस्वा

शुक उवाच ॥ ॥तस्यानुशृण्वतोराजन्प्रह्लादस्यकृतांजलेः ॥ हिरण्यगर्भोभगवानुवाचमधु
सूदनं ॥ बद्धंवीक्ष्यपतिंसाध्वीतत्पत्नीभयविह्वला ॥ प्रांजलिःप्रणतोपेंद्रंबभाषेवाङ्मुखी
नृप ॥ ॥विंध्यावल्युवाच ॥ ॥ क्रीडार्थमात्मनइदंत्रिजगत्कृतंतेस्वाम्यंतुतत्रकुधियोपरई
शकुर्युः ॥ कर्तुःप्रभोस्तवकिमस्यतआवहंतित्यक्तह्रियस्त्वदवरोपितकर्तृवादाः ॥ ब्र
ह्मोवाच ॥ ॥भूतभावनभूतेशदेवदेवजगन्मय ॥ मुंचैनंहृतसर्वस्वंनायमर्हतिनिग्रहं ॥ कृ
त्स्नातेनेनदत्ताभूर्लोकाःकर्मार्जिताश्चये ॥ निवेदितंचसर्वस्वमात्माविक्लवयाधिया ॥
यत्पादयोरशठधीःसलिलंप्रदायदूर्वांकुरैरपिविधायसतींसपर्यां ॥ अप्युत्तमांगति
मसौभजतेत्रिलोकींदाश्वानविक्लवमनाःकथमार्तिमृच्छेत् ॥ ॥२३॥

मी अतो मंदबुद्धिमेनं केवलं कृपया विमुच्य पालयेति। तदेवं प्रह्लादस्य विंध्यायाश्च परमार्थ्या तया प्रसन्नो हरिः। ब्रह्मा तु लोकदृष्ट्यै
वविज्ञापयति। भूतभावनेति त्रिभिः। निग्रहानर्हत्वे हेतुः। कृत्स्नेति। सर्वस्वमेवाह। आत्मेति। तदेव कैमुत्यन्यायेनाह। यस्यतव
पादयोः सलिलमात्रमपि प्रदाय सर्वोपि जनः उत्तमां गतिं प्राप्नोति। तस्मै तुभ्यमसौ बलिस्त्रिलोकीं दाश्वान्दत्तवान्। आर्तिं कथं

श्रीभुजाग॰ ॥ ॥

तस्यविशश्चर्थान्।नच्चर्यापहारःकोयमनुग्रहस्तत्राह।यन्मदोयैरर्थैर्मदोयस्य।अतएवस्तब्धअनम्रःसन्।मदस्तंभहेतूनाम
र्थानामपहारएवानुग्रहइत्यर्थः।दुर्लभंपुरुषजन्मकर्पविलक्षणवतोजीवस्यजन्मादिनिमित्तात्स्वमोहात्कोहानिकरस्तस्य
नाशोमदनुग्रहादेवेत्यर्थः।।यदेतिद्वाभ्यां।अनीशःपरतंत्रःसन्निजैःकर्मभिर्नानायोनिषुकृमिकीटादिषुसंसरन्।तत्रपौरुषीं
गतौजन्मादिभिरस्यस्तंभोयदिनभवेत्।।तर्ह्ययंमदनुग्रहएव।कर्पनहिध्रुवादिभ्यःसंपदादददासीत्त्विदतत्राह।मानस्तं

५२ श्रीभगवानुवाच।। ।।ब्रह्मन्यमनुगृह्णामि विशस्तस्यधुनोम्यहं।।यन्मदःपुरुषस्तब्धो
लोकंमांचावमन्यते।।यदाकदाचिज्जीवात्मासंसरन्निजकर्मभिः।।नानायोनिष्वनी
शोयंपौरुषींगतिमाव्रजेत्।।जन्मकर्मवयोरूपविद्यैश्वर्यधनादिभिः।।यद्यस्यनभवेत्स्तं
भस्तत्रायंमदनुग्रहः।।मानस्तंभनिमित्तानांजन्मादीनांसमंततः।।सर्वश्रेयःप्रतीपानां ५२
हंतमुह्येन्नमत्परः।।एषदानवदैत्यानामग्रणीःकीर्त्तिवर्द्धनः।।अजैषीदजयांमायांसीद
न्नपिनमुह्यति।।क्षीणरिक्थश्च्युतःस्थानात्क्षिप्तोबद्धश्चशत्रुभिः।।ज्ञातिभिश्चपरित्य
क्तोयातनामनुयापितः।।गुरुणाभर्त्सितःशप्तोजहौसत्यंनसुव्रतः।।छलैरुक्तोमयाधर्मोना
यंत्यजतिसत्यवाक्।।एषमेप्रापितःस्थानंदुष्प्रापममरैरपि।।सावर्णेरंतरस्यायंभवितेंद्रोमदाश्रयः।।

भः।अनम्रतातस्यनिमित्तभूतानांसमंततःसर्वश्रेयःप्रतिकूलानांजन्मादीनांसत्त्वेपिजन्मादिभिरितिवा।।हंतहेब्रह्मन्मत्परोन
मुह्येत्।अतोभक्तिच्छयासंपदोददामि।अभक्तस्तुमुह्येदितितदपहाररूपमेवतस्यानुग्रहंकरोमीतिभावः।अस्यैवेदानींपत्र
रत्वादन्यैर्दुःप्रापमपिदास्यामीतिवक्तुंतस्यमोहाभावमाह।एषइतित्रिभिः।नह्येतस्मिन्कुलेकश्चिन्निःसत्त्वःकृपणःप्र
मान्इत्यादिनाछलैरेवमयाधर्मउक्तःतथापितंधर्मंमयंनत्यजति।अतःसत्यवाक्।मेमया।अहमेवाश्रयःपालकोयस्यसः।। ।।छ

स्थानंत्रापितदितियदुक्तंतदेवस्थानमाह।तावत्सावर्णिमन्वंतरपर्यंतंसुतलमध्यास्तांअधिवसत्वित्यर्थः।यद्यस्मिन्निवसतां आध्याद्योममेक्षयानसंभवंति॥एवंब्रह्माणंप्रत्युक्त्वाकरुणापरवशःसाक्षाद्बलिंप्रत्याह।इंद्रसेनेतिचतुर्भिः।त्वच्छास नमतिगच्छंतिअतिवर्त्ततइति।नपातानः।तथापिभगवद्वियोगात्नदनिष्ठंतंप्रत्याह।संदतीति।संगाच्चआसुरोभावःसचनक्ष्यति॥

तावत्सुतलमध्यास्तांविश्वकर्मविनिर्मितं॥यत्राधयोव्याधयश्चक्लमस्तंद्रापराभवः॥
नोपसर्गानिवसतांसंभवंतिममेक्षया॥इंद्रसेनमहाराजयाहिभोभद्रमस्तुते॥सुत
लंस्वर्गिभिःप्रार्थ्यंज्ञातिभिःपरिवारितः॥नत्वामभिभविष्यंतिलोकेशाःकिमुताप
रे॥त्वच्छासनातिगान्दैत्यान्चक्रंमेसूदयिष्यति॥रक्षिष्येसर्वतोहंत्वांसानुगंसप
रिच्छदं॥सदासंनिहितंवीरतत्रमांद्रक्ष्यसेभवान्॥तत्रदानवदैत्यानांसंगात्तेभा
वआसुरः॥दृष्ट्वामदनुभावंवैसद्यःकुंठोविनंक्ष्यति॥ ॥इतिश्रीभागवतेमहापु
राणेऽष्टमस्कंधेबलिमोक्षणंनामद्वाविंशोध्यायः॥ ॥शुकउवाच॥ ॥इत्युक्त
वंतंपुरुषंपुरातनंमहानुभावोखिलसाधुसंमतः॥बद्धांजलिर्बाष्पकलाकुलेक्ष
णोभक्त्युत्कलोगद्गदयागिराब्रवीत्॥ ॥

॥ ॥इत्यष्टमेद्वाविंशः॥ ॥त्रयोविंशेबलौयातेसुतलंसपितामहे॥उपेंद्रेणदिवंगत्वापर्ववन्मोदतेहरिः।बाष्पस्यकलाभिर्बिंदु
भिराकुलेईक्षणेयस्यभक्त्याउत्कलःउत्कंठः॥ ॥ ॥

८५

अहोत्वत्प्रणामस्यमहिमायदर्थंकृतःसमुद्यमएवप्रपन्नानांभक्तानांयोऽर्थस्तस्यविधौअभक्तोऽतस्यसंपादनेसमाहितः।अ
प्रमत्तेःस्थितः।कुतः।यद्येनोद्यमेनलोकपालैरमरैःसत्वप्रधानैरपिअलब्धपूर्वस्त्वदनुग्रहःअपसदेनीचेराजसेमय्य
र्पितः।अयंभावःपरमेश्वराणामनुग्रहमहत्वंराज्यंत्रिलोकींदत्तवानित्येतदास्तां॥प्रणामोपिनसम्यक्कृतःकिंतुतदर्थमुद्य

५२ ॥बलिरुवाच॥ ॥अहोप्रणामायकृतःसमुद्यमःप्रपन्नभक्तार्थविधौसमाहितः॥य
ल्लोकपालैस्त्वदनुग्रहोऽमरैरलब्धपूर्वोऽपसदेऽसुरेर्पितः॥ ॥शुकउवाच॥ ॥इत्युक्त्वा
हरिमानम्यब्रह्माणंसभवंततः॥विवेशसुतलंप्रीतोबलिर्मुक्तःसहासुरैः॥एव ५२
मिंद्रायभगवान्प्रत्यानीयत्रिविष्टपं॥पूरयित्वादितेःकाममशासत्सकलंजग
त्॥लब्धप्रसादंनिर्मुक्तंपौत्रंवंशधरंबलिं॥निशाम्यभक्तिप्रवणःप्रह्लादइदम
ब्रवीत्॥ ॥प्रह्लादउवाच॥ ॥नेमंविरिंचोलभतेप्रसादंनश्रीर्नशर्वःकिमुतापरे
ते॥यन्नोऽसुराणामसिदुर्गपालोविश्वाभिवंद्यैरभिवंदितांघ्रिः॥यत्पादपद्ममकरं
दनिषेवणेनब्रह्मादयःशरणदाश्नुवतेविभूतीः॥कस्माद्वयंकुसृतयःखलयोन
यस्तेदाक्षिण्यदृष्टिपदवींभवतःप्रणीताः॥ ॥

ममात्रेकृतंतेनकर्मतपोदानादिकोटिभिरप्यलभ्यस्त्वदनुग्रहःसंपादितः।अहोत्वत्प्रणामप्रभावाश्चर्यमिति॥आशासते॥
उपेंद्रसत्पालनमामसिदुर्गपालोसिरक्षिषिसर्वतोहिमित्युक्तेत्वात्।हेशरणदश्रीशाप्रद।येकुसृतयःदुर्वृत्ताःखलयोनयः
अप्रजातपश्चात्तेवयंतस्यभवतोदाक्षिण्यदृष्टेःपदवींकस्माद्धेतोःप्रणीताःवकुमानेनविजानीमःवर्त्मनंदाक्षिण्यंतेनदृष्टिस्तद्

भक्तप्रियत्वादितिचेत्तर्हिएवंतवेहितंचित्रंकितत्रसर्वात्मनःसमदृशश्चस्वभावोविषमइति।यत्।सर्वात्मत्वेविविचरितत्वेहे
तुः।अमिता।अचिंत्यायोगमायातया।यालीला।तयाविसृष्टानिरचितानिभुवनानियेनतस्य॥अहोइत्यत्रसंधिरार्षः।समदृशा
त्वेहेतुः।विशारदस्यसर्वज्ञस्य।अथवाभक्तप्रियत्वेपितत्रवैषम्यंनास्त्येवयतःकल्पतरुस्वभावःसत्वंभक्तप्रियोसि।नहिकल्प

चित्रंतवेहितमहोमितयोगमायालीलाविसृष्टभुवनस्यविशारदस्य॥सर्वात्मनःसमदृ
शोविषमस्वभावोभक्तप्रियोयदसिकल्पतरुःस्वभावः॥ ॥श्रीभगवानुवाच॥ ॥वत्सप्राह्ला
दभद्रंतेप्रयाहिसुतलालयं॥मोदमानःस्वपौत्रेणज्ञातीनांसुखमावह॥नित्यंद्रष्टासिमांत
त्रगदापाणिमवस्थितं॥मद्दर्शनमहाह्लादध्वस्तकर्मनिबंधनः॥शुकउवाच॥आज्ञांभ
गवतोराजन्प्रह्लादोबलिनासह॥बाढमित्यमलप्रज्ञोमूर्ध्न्याधायकृतांजलिः॥परिक्र
म्यादिपुरुषंसर्वासुरचमूपतिः॥प्रणतस्तदनुज्ञातःप्रविवेशमहाबिलं॥अथाहोश
नसंराजन्हरिर्नारायणोंतिके॥आसीनमृत्विजांमध्येसदसिब्रह्मवादिनां॥ब्रह्मन्संतनु
शिष्यस्यकर्मच्छिद्रंवितन्वतः॥यत्तत्कर्मसुवैषम्यंब्रह्मदृष्टंसमंभवेत्॥ ॥ठ॥

२२

तरुराराधकानामेवकामान्पूरयन्विषमोभवतीतिभावः।मद्दर्शनेनमहानाह्लादस्तेनध्वस्तंकर्मबंधनमज्ञानंयस्य।कर्मवित
न्वतः।शिष्यस्यछिद्रंअंतरंन्यूनंयातंतत्सततनुविस्तारयज्ञसंधृत्वा।यजमानंविनाकथंसंधातव्यमितिनवाच्यमित्याह।यत्तदिति
ब्रह्मदृष्टंब्राह्मणैर्दृष्टमेवसमंभवेत्किंपुनरनुष्ठितमित्यर्थः॥ ॥ठ॥ ॥

भवान्यस्यसर्वेणापिभावेनवस्तुमात्रेणपूजितस्तस्यकर्मसुकुतोवैषम्यंकथंभूतः।कर्मणामीश्वरःप्रवर्त्तकः।यज्ञेशोयज्ञफल
दःयज्ञमयश्चपुरुषः।आस्तांतावत्पूजा।यस्मान्मंत्रतःस्वरादिभ्रंशेन।तंत्रतोव्युत्क्रमादिना।देशतःकालतश्च।अर्हतःपात्रतोव
स्तुतश्चदक्षिणादिनायच्छिद्रंन्यूनंतत्सर्वंतवानुकीर्त्तनमात्रमेवनिश्छिद्रंकरोति।इतिहरेराज्ञांप्रतिनंद्यबलेर्यज्ञछिद्रंसमाधत्तसं

शुकउवाच॥ ॥कुतस्तत्कर्मवैषम्यंयस्यकर्मेश्वरोभवान्॥यज्ञेशोयज्ञपुरुषःसर्वभावे
नपूजितः॥मंत्रतस्तंत्रतश्छिद्रंदेशकालार्हवस्तुतः॥सर्वंकरोतिनिश्छिद्रमनुसंकीर्त्तनं
तव॥तथापिवदतोभूमन्करिष्याम्यनुशासनं॥एतच्छ्रेयःपरंपुंसांयदाज्ञामनुपालनं॥
५३ शुकउवाच॥अभिनंद्यहरेराज्ञामुशनाभगवानिति॥यज्ञछिद्रंसमाधत्तबलेर्विप्रर्षिभिः
सह॥एवंबलेर्महींराजन्भिक्षित्वावामनोहरिः॥ददौभ्रात्रेमहेंद्रायत्रिदिवंयत्परैर्हृतं॥
प्रजापतिपतिर्ब्रह्मादेवर्षिपितृभूमिपैः॥दक्षभृग्वंगिरोमुख्यैःकुमारेणभवेनच॥कश्य ५३
पस्यादितेःप्रीत्यैसर्वभूतभवायच॥लोकानांलोकपालानामकरोद्वामनंपतिं॥वेदानां
सर्वदेवानांधर्मस्ययशसःश्रियः॥मंगलानांव्रतानांचकल्पंस्वर्गापवर्गयोः॥लोकपाले
र्दिवंनिन्येब्रह्मणाचानुमोदितः॥प्राप्यत्रिभुवनंचेंद्रभुजउपेंद्रभुजपालितः॥श्रियापर
मयाजुष्टोमुमुदेगतसाध्वसः॥ब्रह्माशर्वःकुमारश्चभृग्वाद्यामुनयोनृप॥पितरःसर्वभूता
निसिद्धावैमानिकाश्चये॥ ॥ठ॥

दधे।पाठांतरेसमाधाम।तामाज्ञांसंपादितवानितिशेषः।देवाश्चऋषयश्चभूमिपाश्चतैःसहितः।ननुलोकादीनांपतिरिंद्रोऽस्त्ये
व।सत्यंयथापिदेवादीनांकल्पंपालनेदक्षं॥वामनमुपेंद्रं।कल्पयांचक्रे।देवयानेनमार्गेण।विमानेनेतिवा॥ ॥छ॥

एतच्चरितं सर्वमाख्यातमिति विशेषो ऽत्यात्रन्यान्यपि संतीत्युक्तं। तानि तर्हि निःशेषाणि वर्णनीयानीत्यपेक्षायामाह। पार
मिति। उरुवहुधा विक्रमतो विष्णोर्महिम्नः पारं यो गणनेन भवति। समर्त्यः पार्थिवानि रजांस्यपि विममे गणितवान्। यथा पार्थिव
परमाणुगणनमशक्यं तथा विष्णोर्गुणगणनमशक्यमित्यर्थः॥ तथा च मंत्रः। विष्णोर्नुकं वीर्याणीति। एतदेव मंत्रांतरार्थं स्तुव
न्नाह। यस्य पुरुषस्य सृष्टेस्य महिम्नः पारं मंत्रदृग् ऋषिर्वशिष्टः इत्येवमाह। कथं। किं जायमानो जातो वा उपैति न कोपीति वद

९१

मुमंत्रकर्मतद्विष्णोर्गीयते तः परमाद्भुतं॥ धिष्ण्यानि स्थानिते जग्मुरदितिं च प्रशशंसिरे॥ सर्वमेतन्मयाख्या
तं भवतः कुलनंदन॥ उरुक्रमस्य चरितं श्रोतॄणामघमोचनं॥ पारं महिम्न उरुविक्रमतो गृणा
नो यः पार्थिवानि विममे सरजांसि मर्त्यः॥ किं जायमान उत उपैति न कोपि मर्त्य इत्याह मंत्रदृ
गृषिः पुरुषस्य यस्य॥ य इदं देवदेवस्य हरेरद्भुतकर्मणः॥ अवतारानुचरितं शृण्वन्याति परां
गतिं॥ क्रियमाणे कर्मणीदं दैवे पित्रे च मानुषे॥ यत्र यत्रानुकीर्त्येत तत्तेषां सुकृतं विदुः॥ ॥
इति श्रीभागवते महापुराणे ऽष्टमस्कंधे वामनावतारानुचरिते त्रयोविंशोध्यायः॥ ॥राजो
वाच॥ ॥भगवन्श्रोतुमिच्छामि हरेरद्भुतकर्मणः॥ अवतारकथामाद्यां मायामत्स्यवि
डंवनं॥ ॥

न्न नंतत्वेनैवाहेत्यर्थः। तथा च मंत्रः। न ते विष्णो जायमानो न जातो देव महिम्नः पारमंतमापेति। य इदं शृण्वन्नवति स परां गतिं
याति। सुकृतं यथा व सुकृतं विदुः॥ अष्टमे त्रयोविंशः॥ ॥ चतुर्विंशे प्रसंगेन मत्स्यरूपस्य शार्ङ्गिणः॥ लीलोच्यते यतः सम्य
ग्रक्षा महार्णवे॥ तनुं तनुं निदर्शपादो निजरूपदर्शनात्॥ मत्स्यं पृच्छति पृथ्वीशो लीलया वामनोपमं॥ मायामत्स्यविडंवनं मत्स्यरूपमा

ननुकस्मात्[पुरु]स्मादेवंमत्स्यावतारश्रवणेऽभावामनसादृश्यादित्याह॥ यदर्थमिति द्वाभ्यां॥ दुर्मर्षं दुःसहं बलेरनुग्रहाय जुगु
प्सितमपि वामनकरूपं धृतवानिति युक्तमुक्तं यदर्थं तु लोकजुगुप्सितं मात्स्यं रूपमधारयत्॥ एतन्नो यथावद्वक्तुमर्हतीत्यर्थः॥
सामान्येनावतारप्रयोजनमाह॥ गोविप्रेति॥ जुगुप्सितत्वं परिहरति॥ धियो गुणैर्यान्युच्चावचनिरूपाणि तेषु निर्यत्त्वेनवर

यदर्थमदधाद्रूपं मात्स्यं लोकजुगुप्सितं॥ तमःप्रकृतिदुर्मर्षं कर्मग्रस्त इवेश्वरः॥ एतन्नो भग
वन्सर्वं यथावद्वक्तुमर्हसि॥ उत्तमश्लोकचरितं सर्वलोकसुखावहं॥ ॥श्रीसूत उवाच॥
इत्युक्तो विष्णुरातेन भगवान्बादरायणिः॥ उवाच चरितं विष्णोर्मत्स्यरूपेण यत्कृतं॥
शुक उवाच॥ गोविप्रसुरसाधूनां छंदसामपि चेश्वरः॥ रक्षामिच्छंस्तनूर्धत्ते धर्मस्यार्थ
स्य चैव हि॥ उच्चावचेषु भूतेषु चरन्वायुरिवेश्वरः॥ नोच्चावचत्वं भजते निर्गुणत्वाद्धि
यो गुणैः॥ आसीदतीतकल्पांते ब्राह्मो नैमित्तिको लयः॥ समुद्रोपप्लुतास्तत्र लोका भूराद
यो नृप॥ कालेनागतनिद्रस्य धातुः शिशयिषोर्बली॥ मुखतो निःसृतान्वेदान्हयग्रीवोंति
केऽहरत्॥ ज्ञात्वा तद्दानवेंद्रस्य हयग्रीवस्य चेष्टितं॥ दधार शफरीरूपं भगवान्हरिरीश्वरः॥ तत्र रा
जऋषिः कश्चिन्नाम्ना सत्यव्रतो महान्॥ नारायणपरोऽतप्यत्तपः स सलिलाशनः॥ योऽसावस्मिन्
महाकल्पे तनयः स विवस्वतः॥ श्राद्धदेव इति ख्यातो मनुत्वे हरिणार्पितः॥

न्नपीश्वरोच्चावचत्वं भजते निर्गुणत्वात्॥ कुतः पुनः शुद्धसत्त्वमयैर्मत्स्याद्यावतारैरुच्चावचत्वशंकेति भावः॥ विशेषतो मत्स्यावतारप्रयोजनमाह॥ आसीदिति त्रिभिः॥ ब्रह्मणो निद्रायोगो भवो ब्राह्मस्तेनैव निमित्तेन जातो नैमित्तिकः॥ समुद्रे उपप्लु
तानि मग्नाः॥ अंतिके निःसृतान्॥ शफरीरूपं मत्स्यरूपं प्रयोजनांतरं लीलाप्रकारं चाह॥ तत्र राजर्षिरित्यादि यावत्समाप्तिः॥

५४

५४

कृतमालां॥यत्राहंसुखंनिवसामितदोकःस्थानंकल्पय॥औदंचनोदकेमणिकस्थेजलेरक्षायायोगेनोपायेन॥यथामहाक्रद
एकदाकृतमालायांकुर्वतोजलतर्पणं॥तस्यांजल्युदकेकाचिच्छफर्येकाभ्यपद्यत॥सत्यव्रतोंजलिगतां
सहतोयेनभारत॥उत्ससर्जनदीतोयेशफरींद्रविडेश्वरः॥तमाहसातिकरुणंमहाकारुणिकंनृपं॥यादो
भ्योज्ञातिघातिभ्योदीनांमांदीनवत्सल॥कथंविसृजसेराजन्भीतामस्मिन्सरिज्जले॥तमात्मनोनुग्रहा
र्थंप्रीत्यामत्स्यवपुर्धरं॥अजानन्रक्षणार्थायशफर्याःसमनोदधे॥तस्यादीनतरंवाक्यमाश्रुत्यसम
हीपतिः॥कलशाप्सुनिधायैनांदयालुर्निन्यआश्रमं॥सातुतत्रैकरात्रेणवर्द्धमानाकमंडलौ॥अलब्ध्वा
त्मावकाशंवाइदमाहमहीपतिं॥नाहंकमंडलावस्मिन्कृच्छ्रंवस्तुमिहोत्सहे॥कल्पयौकःसुविपुलंयत्रा
हंनिवसेसुखं॥सएनांततआदायन्यधादौदंचनोदके॥तत्रक्षिप्तामुहूर्त्तेनहस्तत्रयमवर्द्धत॥नम
एतदलंराजन्सुखंवस्तुमुदंचनं॥पृथुदेहिपदंमह्यंयत्त्वाहंशरणंगता॥ततआदायसाराज्ञाक्षिप्ता
राजन्सरोवरे॥तदावृत्यात्मनासोयंमहामीनोन्ववर्धत॥नैतन्मेस्वस्तयेराजन्नुदकंसलिलौकसः
निधेहिरक्षायोगेनह्रदेमामविदासिनि॥इत्युक्तःसोनयन्मत्स्यंतत्रतत्राविदासिनि॥जलाशयेसंमि
तंतंसमुद्रेप्राक्षिपज्झषं॥क्षिप्यमाणस्तमाहेदमिहमांमकरादयः॥अदंत्यतिबलावीरमांनेहोत्स्र
ष्टुमर्हसि॥एवंविमोहितस्तेनवदतावल्गुभारती॥तमाहकोभवानस्मान्मत्स्यरूपेणमोहयन्॥नैवं
वीर्योजलचरोदृष्टोस्माभिःश्रुतोपिवा॥योभवान्योजनशतमह्नाभिव्यानशेसरः॥नूनंत्वंभगवान्सा
क्षाद्धरिर्नारायणोव्ययः॥अनुग्रहायभूतानांधत्सेरूपंजलौकसां॥ ॥७॥

प्राप्तेरर्वाकजलंविनानसुष्येयंतेनोपायेननिधेहि॥अविदासिनिअनुपक्षयोसंमितंतज्जलाशयपरिमितंसंतं॥अभि

०स्क०

सुष्व: सध्व: । आत्मा गतिश्च आश्रयः । हे अरविंदाक्ष । दृष्पगात्मनां देहाद्यभिमानिनां । असतां मितरेषां पादोपसर्पणं यद्यपामृषा भवे
त्‌: तथापि सर्वसुहृत्प्रियात्मनस्तव पादोपसर्प्पणं मृषा न भवेत्‌ यद्यस्मात्त्वं भक्तानां मङ्कृतं वपुरदीदृशो दर्शितवानसि ॥ दृष्पगा

॥ ४

नमस्ते पुरुषश्रेष्ठ स्थित्युत्पत्त्यप्ययेश्वर ॥ भक्तानां नः प्रपन्नानां मुख्यो ह्यात्मा गतिर्विभो ॥ सर्वे लीलावता
रास्ते भूतानां भूतिहेतवः ॥ ज्ञातुमिच्छाम्यदो रूपं यदर्थं भवता धृतं ॥ न ते ऽरविन्दाक्ष पदोपसर्प्पणं मृषा
भवेत्सर्वसुहृत्प्रियात्मनः ॥ यथेतरेषां दृष्पगात्मनां सतामदीदृशो यद्वपुरद्भुतं हि नः ॥
इति ब्रुवाणं नृपतिं जगत्पतिः सत्यव्रतं मत्स्यवपुर्युगक्षये ॥ विहर्त्तुकामः प्रलयार्णवे
ब्रवीच्चिकीर्षुरेकांतजनप्रियः प्रियं ॥ ॥ श्रीभगवानुवाच ॥ ॥ सप्तमे ह्यद्यतनादूर्ध्वम
हन्येतदरिंदम ॥ विनङ्क्ष्यत्यप्ययांभोधौ त्रैलोक्यं भूर्भुवादिकं ॥ त्रिलोक्यां लीयमानायां संवर्त्तांभसि वै तदा ॥ उपस्थास्यति नौः काचिद्विशालां त्वां मयेरिता ॥ ॥ ३ ॥

त्मनो भेददर्शिनः पुंसः असतां परिच्छिन्नानां पादोपसर्प्पणं यथा मृषेत्यर्थः ॥ एकांतजना भक्ताः प्रिया यस्य ॥ अप्ययांभोधौ
प्रलयार्णवे भूर्भुवआदिकमित्यर्थः ॥ संवर्त्तांभसि प्रलयोदके त्वां उपस्थास्यति प्राप्स्यति ॥ ॥ ३ ॥

५५ ५५

ओषधीरादायेति शेषः॥ ऋषीणामालोके न विचरिष्यसि। महाहिना वासुकिना॥ अनुगृहीतं प्रसादीकृतं॥ अपरोक्षं

त्वं तावदोषधीः सर्वा बीजान्युच्चावचानि च॥ सप्तर्षिभिः परिवृतः सर्वसत्त्वोपबृंहितः॥ आ
रुह्य बृहतीं नावं विचरिष्यस्यविक्लवः॥ एकार्णवे निरालोके ऋषीणामेव वर्चसा॥
दोधूयमानां तां नावं समीरेण बलीयसा॥ उपस्थितस्य मे शृंगे बध्नीहि महाहिना॥ अहं त्वा
मृषिभिः सार्कं सह नावमुदन्वति॥ विकर्षन्विचरिष्यामि यावद्ब्राह्मी निशा प्रभो॥ मदीयं
महिमानं च परं ब्रह्मेति शब्दितं॥ वेत्स्यस्यनुगृहीतं मे संप्रश्नैर्विवृतं हृदि॥ इत्थमादिश्य राजा
नं हरिरंतरधीयत॥ सोऽन्ववैक्षत तं कालं यं हृषीकेश आदिशत्॥ आस्तीर्य दर्भान्प्राक्कूला
न्राजर्षिः प्रागुदङ्मुखः॥ निषसाद हरेः पादौ चिंतयन्मत्स्यरूपिणः॥ ततः समुद्र उद्वेलः स
र्वतः प्लावयन्महीम्॥ वर्द्धमानो महामेघैर्वर्षद्भिः समदृश्यत॥ ध्यायन्भगवदादेशं ददृशे नाव
मागतां॥ तामारुरोह विप्रेंद्रैरादायौषधिवीरुधः॥ तमूचुर्मुनयः प्रीता राजन्ध्यायस्व केशवं॥
स वै नः संकटादस्मादविनाशं विधास्यति॥ सोऽनुध्यातस्ततो राज्ञा प्रादुरासीन्महार्णवे॥ एक
शृंगधरो मत्स्यो हैमो नियुतयोजनः॥ निबध्य नावं तच्छृंगे यथोक्तो हरिणा पुरा॥ वरत्रेणाहि
नातुष्टस्तुष्टाव मधुसूदनं॥ ॥८॥

वेत्स्यसि लप्स्यसे। संप्रश्नैर्मया विवृतं संतं। वरत्रेण डोरकरूपेण॥ ॥७॥

प्रलपर प्रलपेर

सागरं [illegible] रयित्वा [illegible] द्विवसागरं॥ सत्यव्रतो गुरुत्वेन तुष्टाव हरिमष्टभिः॥ अत्रेदं चिंत्यं किमयं महाप्रलयो दैनंदिनो वेति
तत्र [illegible] न [illegible] यो सावस्मिन्महाकल्पे इति चोक्ते र्महाकल्पत्वमिति प्राप्तं॥ नेति ब्रूमः॥ महाकल्पे पृथिव्यादीनां
मवशे [illegible] त्याव॥ यावद्ब्रह्मीनिद्रोत्यायुक्तिविरोधात्॰ अतो दैनंदिन इति युक्तं। न चैतदपि संगच्छते। सावर्त्तके रनाष्ट
ष्ट्याद्रिपतनात्। कस्मादेवसप्तमेह नि त्रैलोक्यं विनंक्ष्यतीति मत्स्योक्तेरनुपपत्तेः॥ यच्चोक्तं प्रथमस्कंधे। रूपं स जगृ
हे मात्स्यं चाक्षुषांतरसंप्लवे। नाव्यारोप्य महीमय्यामपाद्वैवस्वतं मनुमिति॰ तदपि तदाऽघटं। नहि प्रलयद्वयेपि म
हीमय्यां नाव्यारोहः संभवति। न च चाक्षुषे मन्वंतरे प्रलयोस्तितथावसति सप्तमो मन्वंतरो वैवस्वतेऽप्यपि ऽघटं स्या

५६ राजोवाच॥ ॥ अनाद्यविद्योपहतात्मसंविदस्तन्मूलसंसारपरिश्रमातुराः॥ यदृच्छयेहोपस ५६
तयमाप्नुयुर्विमुक्तिदो नः परमो गुरुर्भवान्॥ ॥ ४॥

त्। त्वं तावदोषधीः सर्वा इत्यादि निर्देशोपि न संगच्छते। नहि तथा औषध्यादीनां सत्वानां वावशेषः संभवति तस्मादन्य
या वर्ण्यते। नैवायं वास्तवः कोपि प्रलयः किंतु सत्यव्रतस्य ज्ञानोपदेशाय विमृष्टो भगवान्वैराग्यार्थमकस्मात्प्रलयमिवद
र्शयामास। यथास्मिन्नेव वैवस्वत मन्वंतरे मार्कंडेयाय दर्शितवान्। तदपेक्षयैव च महाकल्पेस्मिन्निति विशेषणं संगतं तथा
ततः समुद्र उद्वेलः सर्वतः समदृश्यतेति तत्स्यैव तथा दर्शनमित्येषा दिक्। प्रस्तुतं स्तोत्रं मामस्या स्याम। तत्र नानायो नि मुसंस
रतः स्वस्य भगवत्कृपयैव तत्प्राप्तिं दृष्ट्वा मुक्तये तमेव प्रार्थयते। अनादियाऽविद्ययाऽपहता आहृता आत्मसंविद्येषां
ते। अत एवाविद्यामूलैः संसारपरिश्रमैरातुराः। इह संसारे यदृच्छया यदनुग्रहादेव उपसृता आसृताः संतो यं प्राप्नुयुः। स भव
नेव मादाता नो गुरुः सन्ग्रंथिं भिंद्यादित्युत्तरेणान्वयः॥ ॥ ४॥

ननु वैराग्यं विनाकुतो मुक्तिस्तर्हि तस्य त्वत्सेवैकफलत्वात्सेवामादिशेत्याशयेनाह। अबुधोयं जनः। असुखं यदा
कर्म समीहते। मा सुखेच्छा नो हृदयरूपाग्रे चिमभिंद्यात्। यतः स एव परमो गुरुः। ननु यद्वदानादिभिः सत्वशुद्धिं वि
भेदः स्यात्। तत्राह। यस्य सेवयैव पुमानात्मनो मनसो मलं नमो विजह्यात् अहीनमलो निजवर्णस्वरूपं भजेत् मद्दु
र्लभोत्। अतः स एव गुरोरपि परमो गुरुः। मलहानो दृष्टांतः। रुद्ररोदनं यजन्तं। यद्रोदीत्तद्रुद्रस्य रुद्रत्वं यदव
तं हिरण्यमभवदिति श्रुतेः। तथाग्नेः संपर्कान्मलं जहाति स्ववर्णं भजते ननु क्षालनादिनाभिः॥ तथा न जह्यादि... भागः

जनोबुधोयं निजकर्मबंधनः सुखेच्छया कर्म समीहतेऽसुखं॥ यत्सेवया तां विधुनोत्यसन्मतिं ग्रं
थिं स भिंद्याद्धृदये स नो गुरुः॥ यत्सेवयाग्नेरिव रुद्ररोदनं पुमान्विजह्यान्मलमात्मनस्तमः॥ भ
जेत वर्णं निजमेष सोऽव्ययो भूयात्स ईशः परमो गुरोर्गुरुः॥ न यत्प्रसादायुतभागलेशमन्ये च देवा
गुरवो जनाः स्वयं॥ कर्तुं समेताः प्रभवंति पुंसस्तमीश्वरं त्वां शरणं प्रपद्ये॥ अचक्षुरंधस्य यथा
ग्रणीः कृतस्तथा जनस्याविदुषोऽबुधो गुरुः॥ त्वमर्कदृक् सर्वदृशां समीक्षणो वृतो गुरुर्नः स्व
गतिं बुभुत्सतां॥ ॥ठ॥

किंतु ...मेव वयेव तेषां तु सेवां गत्वमिति भावः। परमेश्वरत्वं च परमगुरुत्वं च प्रपंचयन्नाह। यत्प्रसादस्यायुतभागस्तस्य लेश
मात्रमपि अन्ये देवादयः सर्वे समेता अपि स्वयं तन्निरपेक्षाः संतः कर्तुं न प्रभवंति। तदेव दृष्टांतेन स्पष्टयन्नाह। अचक्षु
रिति। अविदुषो जनस्य अबुधोऽविद्वान् गुरुः तथैव। अर्कस्य प्रकाशवत्स्वत एव दृक् ज्ञानं यस्य स अर्कदृक्। अतः सर्वदृशां
सर्वेषामिंद्रियाणां समीक्षणः प्रकाशकः। अत एव स्वगतिं बोद्धुमिच्छद्भिर्नोऽस्माभिर्गुरुर्वृतोऽसि॥ ॥ठ।

श्री०

किंवा।प्राकृतोगुरुरनर्थहेतुरित्याह।आदिशतेउपादिशति।असतींमतिं अर्थकामादिमतिं।तमःसंसारं।ननुतर्हिसर्वोपिलोकोतेमामेवकिंनोपसरति।अज्ञानादित्याह॥प्रियश्चासावीश्वरश्च।अहंतुत्वामेवशरणंयामीत्याह।तंत्वामितिप्रा

५७ जनोजनस्यादिशतेसतींमतिंययाप्रपद्येतदुरत्ययंतमः॥त्वंत्वव्ययंज्ञानममोघमंजसाप्रपद्यते
येनजनोनिजंपदं॥त्वंसर्वलोकस्यसुहृत्प्रियेश्वरोह्यात्मागुरुर्ज्ञानमभीष्टसिद्धिः॥तथापि
लोकोनभवंतमंधधीर्जानातिसंतंहृदिबद्धकामः॥तंत्वामहंदेववरंवरेण्यंप्रपद्यईशंप्रति
बोधनाय॥छिंध्यर्थदीपैर्भगवन्वचोभिर्ग्रंथीन्हृदय्यान्विवृणुस्वमोकः॥ ॥शुकउ ५८
वाच॥ ॥इत्युक्तवंतंपुरुषंभगवानादिपूरुषः॥मत्स्यरूपीमहांभोधौविहरंस्तत्वमब्रवी
त्॥पुराणसंहितांदिव्यांसांख्ययोगक्रियावतीं॥सत्यव्रतस्यराजर्षेरात्मतत्वमशेषतः॥
अश्रौषीदृषिभिःसाकमात्मतत्वमसंशयं॥नाव्यासीनोभगवताप्रोक्तंब्रह्मसनातनं॥ ॥

द
संगततया
।यो निपुणस्स
नाय।अर्थप्रदीपैःपरमार्थप्रकाशकैः।हृदयेभवान्ग्रंथीनहंकारादीन्।स्वमोकःस्वंरूपंविवृणुआत्मसंविद्येषां
पर्तिप्रति॥पुराणसंहितामत्स्यपुराणं।अब्रवीदित्यनुषंगः॥ ॥७॥श्रीकृष्णायनमः॥ पुत्रः।सभवा
॥७॥

भा०अ०

अतीतः पूर्वीयः प्रलयस्तस्य अपाये अवसाने यो यं हरेरवतारस्तं यः कीर्त्तयेत्॥ सत्यव्रतस्य रूपीणां चाक

५८ अतीते प्रलयापाये उत्थितायस वेधसे॥ हत्वासुरं हयग्रीवं वेदान्प्रत्याहरद्धरिः॥ स तु ५८
सत्यव्रतो राजा ज्ञान विज्ञान संयुतः॥ विष्णोः प्रसादात्कल्पेस्मिन्नासीद्वैवस्वतो मनुः
सत्यव्रतस्य राजर्षेर्मायामत्स्यस्य शार्ङ्गिणः॥ संवादं महदाख्यानं श्रुत्वा मुच्येत कि
ल्बिषात्॥ अवतारं हरेर्योमुं कीर्त्तयेदन्वहं नरः॥ संकल्पास्तस्य सिध्यंति सयाति
परमां गतिं॥ प्रलयपयसि धातुः सुप्तशक्तेर्मुखेभ्यः श्रुतिगणमपनीतं प्रत्युपा
दाय हत्वा॥ दितिजमकथयो ब्रह्मसत्यव्रतानां तमहमखिलहेतुं जिह्ममीनं नतोस्मि॥ ॥
॥ इति श्रीभागवते महापुराणे ऽष्टमस्कंधे पारमहंस्यां संहितायां भगवन्मत्स्याव
तारचरितानुवर्णने चतुर्विंशतितमोऽध्यायः॥ ॥छ॥ ॥ ॥श्री॥ ॥

सत्यव्र
त्रिणगच्छंतीति वह्निंगसमवायाद्बहुवचनं। जिह्ममीनं मायामत्स्यं॥ ॥इति श्रीभागवते भावार्थदीपिकायां
श्रीधरस्वामिविरचितायामष्टस्कंधे चतुर्विंशोऽध्यायः॥ ॥छ॥ संवत् १६०३ वरषे आश्विन सुदि शुभं